गीतगोविन्दः सटीकः

३७०



४८ — पत्राणि

श्रीराम

ॐ श्रीरामकन्दा

नं. २६०८
[illegible]
(अपूर्ण)

४८ पन्ना

काश्मीर

ॐ श्रीरामचन्द्राय नमः॥ ॥मेघैर्मेदुरमम्बरम्वनभुवश्श्यामास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवत ॥१॥
दिमंराधेगृहंप्रापय॥इत्थंनन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमंराधामाधवयोर्जयन्ति
यमुनाकूलेरहःकेलयः॥१॥जयन्तिकाः रहःकेलयः॥निर्जनवने॥कयोः राधामाधवयोः॥राधावमा
धवश्चराधामाधवौ॥तयोः राधामाधवयोः॥माशिवश्च धातालक्ष्मीर्निगद्यते॥धवोत्तरो
धवोहृद्यो धवोमर्त्तरिपोषितमितिकोशः॥कस्मिन्नयमुनाकूले॥कथंभूतयोः राधामाधवयोः
चलितयोः॥प्रत्यध्वकुञ्जद्रुमंप्रति॥अध्वाध्वकुञ्जस्यद्रुमस्यतंप्रति॥प्रत्यध्वकुञ्जद्रुमंप्रति॥
द्रुमस्तरवारिजाते इतिकोशः॥कस्मात्नन्दनिदेशतः नन्दस्यनन्दगोपस्यनिदेशआज्ञा
याकत्थंइत्थंयमुनाप्रकारेणइत्थंकथं॥हेराधेप्रापय॥कात्वमेवकं इमंगृहं॥किंप्राप

त्यास्वरित्तंवैदग्धः॥वागदेवताचरित्तेनचित्रितंचित्तमेवसद्मदसन्यस्यसः॥पुनःकथंभूतो ॥५

जयदेवकविः॥पद्मावतीचरणचारणचक्रवर्त्ती॥पद्मावतीनामतस्यैवजाया॥तस्या

श्चरणयोश्चारणेनत्तेनचक्रवर्त्तीप्रधानः॥आत्मनःशृंगाररसमुद्दिश्य[illegible]लोकानुयाति

स्म॥कविर्विद्वान्कविःशुक्रःकविःकाव्यकरस्मृतइति।कोषः॥भुवनादीनांविशेषकेकेवि

दुरुच्यंतेकोषः॥रतिःसुरतरागयोरितिकोषः॥३॥यदिहरिःस्मरणेसरसंमनोयदिवि ला

2 सकलासुकुतूहलम्॥मधुरकोमलकान्तपदावलीशृणुतदाजयदेवसरस्वतीम्॥

हेजनःशृणु।कः।लोकः।जयदेवसरस्वतीम्॥जयदेववाणीं॥कथंभूतांजयदेवसरस्वतीं

मधुरकोमलकान्तपदावलीम्॥मधुराशोभना।कोमलाशिथिला।कान्तमनोज्ञापदानां

211 शब्दानांआवलिःपंक्तिः॥पश्चात्किंकुतूहलंकौतुकंकलासुविलासकलासुरसिकत्वंप्र

यय

यगहं॥ अयं वहस्यः भीरुः कातरः॥ भीरुस्त्रीकातरे त्रसी भीरुरिति कोषः॥ कदा नक्तं रात्रौ नक्तमित्य
द्वैरात्रम्॥ अस्तीत्यपि अंबरं आकाशम्॥ आवरं वस्त्रव्योमयोरिति कोषः॥ कथंभूतं अम्बरं मे
दुरं स्निग्धं केमेघैः सान्द्रं॥ कावनभुवः॥ कथंभूताः श्यामाः कैस्तमालद्रुमैः तामालद्रुमैः॥ व
सलत्वाद्धे स्वं राधा माधिश्यन नंदगोपः स्वगृहं प्रस्थापयामास॥ सैन्यस्य परिवेष आगे
प्रतीरे कूलमित्यपि इति कोषः॥ गृहा गेहे गृहादार इति कोषः॥१॥ वागदेवताचरित्तवित्रि
तवित्तसद्माजयावती चरणचारणचक्रवर्ती श्रीवासुदेवरतिकेलिकथासमेतं भेतं
करोति जयदेवकविः प्रबंधम्॥२॥ करोति जयदेवकविः॥ कं एतं प्रबंधम्॥ कथंभूतं श्रीवा
सुदेवरतिकेलिकथासमेतं॥ श्रीलक्ष्मीश्ववासुदेवश्वतयोरिति केलिः कथा सहितं इत्य
र्थः॥ कथंभूतो जयदेवकविः॥ वागदेवताचरित्तविचित्रितचित्तसद्मा॥ वागदेवतायाः सरस्व

(2)

त्याश्चरित्तं वैदग्ध्यः॥ वाग्देवता चरित्तेन विचित्तं चित्तेमेव सद्म यस्य सः॥ पुनः कथंभूतो

जयदेवकविः॥ पद्मावती चरणचारण चक्रवर्त्ती पद्मावती नाम तस्यैव जाया॥ तस्या

श्चरणयोश्चारणे न तेन चक्रवर्त्ती प्रधानः॥ आत्मनः शृंगारसमुद्दिश्य कां लोकान्यति

स्म॥ कविर्विद्वान्कविः शुक्रः कविः काव्यकरस्मृत इति कोषः॥ मुक्तादीनां विशेषकेके वि

दुस्युच्यंते कोषः॥ रतिः सुरत रागयोरिति कोषः॥ ३॥ यदि हरि स्मरणे सरसं मनो यदि ला

सकलासु कुतूहलम्॥ मधुरकोमलकान्तपदावलीं शृणु तदा जयदेवसरस्वतीम्॥

हे जनः श्रृणु कः॥ लोकाः॥ जयदेवसरस्वतीम्॥ जयदेववाणीं॥ कथंभूतां जयदेवसरस्वतीं

मधुरकोमलकान्तपदावलीम्॥ मधुरा शोभना कोमला शिथिला कान्ता मनोज्ञा पदानां

शब्दानां अवलिः पंक्तिः॥ यद्यास्ति कं कुतूहलं कौतुकं कासु विलासकलासु रसिकत्वं प्र

लोभयति॥ प्रियगुर्यो वित्तः प्रियंगायति॥ कान्त प्रियमानोऽन्यो रिति कोषः॥ शृंगारादौ विष
वीर्ये तिक्ताद्यो द्रवरागयोः॥ यारदे रुद्रधातौ वरसस्या नेदिनी रसाइति कोषः॥ शाके सिद्धत
था विष्णौ वाल्मिककपिले यमेममरार्कागमर्केन्दुके पिशुहरिशादं विदुर्बुधाः॥ ५॥ वाचः पल्लव
यत्युमापतिधरः संदर्भशुद्धिं गिरां जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः शृंगा
रोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धी कोपि न विश्रुतः श्रुतिधरो धोयी कवि क्ष्मा
पतिः॥ पल्लवयति विस्तारयति कः उमापतिधरः॥ काः वाचः गिरः उमापतिधरो कवि वक्ता
विः जानीते कः जयदेव कविः कां संदर्भशुद्धिं कासां गिरां॥ अन्य कवि न्नरेति इत्यर्थः॥ श्र
तिवः शरणः शरणागत वत्सल कविः कथं भूतः श्लाघ्यः कस्मात् दुरूहद्रुतेः दुःखेन ऊह्यते
इति दुरूहः॥ दुरूहद्रुतं शीघ्रं न विश्रुतः॥ नास्ति कः कोपि कविः किं विशिष्टः गो[illegible]ः स्प
र्द्धी आचार्य गोवर्द्धन स्पर्द्धी॥ गोशब्दः पशु भूम्यं स्मु वाग्दिग् अर्थः॥ वयकुज्पते स्वर्ग लोचन (3)

वर्द्धनः २

३॥

नराणामप्युकुलिशाग्रे पिदृश्यते॥ इति कोषः॥ के॰ शृंगारोत्तरसत्प्रमेयरचनैः शृंगाररसेणा
मुत्तरश्रेष्ठं॥ शृंगारोत्तरस्य सत्प्रमेयरचनानि शृंगारो नाम शृंगारः शृंगारोऽस्मरखण्डनं इ
ति कोषः॥ अस्तिकः धोयी नाम कश्चन कथंभूतः कविः क्ष्मा इति कविराज इत्यर्थः। पुनः क
थंभूतः श्रुतिधरः ख्यातावधारी॥ ध्रा॥ गोरापालवेरागे यतितालो॥ ॥प्रलयपयोधिजले धृ
तवानसि वेदं विहितवहित्रचरित्रमखेदम्॥ असि भवसि के त्वं कथंभूतः उद्धृतवान् कं वे
3 दं॥ कस्मिन् प्रलयपयोधिजले प्रलये प्रलयकाले पयोधिजले एकार्णवीभूते जले कथं
यथा स्यात्॥ विहितवहित्रचरित्रं विहितं कृतं वहित्रस्य पोतस्य चरित्रं यस्मिन् क
र्मणि अखेदं निष्प्रयासम्॥ केशव केशव धृतमीनशरीर जय जय जगदीश हरे॥ हे केशव
हे श्री केशव धृतमीनशरीर धृतं मीनस्य शरीरं येन तत्सम्बुद्धौ त्वं जय॥ जगदीशः जगतामी
शः॥ यमानिलेन्द्रचंद्रार्के विष्णुसिंहांशुवाजिषु शुकाहिकपिभेकेषु हरिस्ना कपिले त्रिषु॥ ३।

ध्रुवपदम्॥ क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे धरणिधरणकिणचक्रगरिष्ठे॥ तिष्ठति का
क्षितिः पृथ्वी कस्मिन् पृष्ठे कस्य तव कथंभूते पृष्ठे अतिविपुलतरे॥ अतिमहान्तरे॥ पुनः कथं
भूते धरणिधरणकिणचक्रगरिष्ठे॥ धरण्याः पृथिव्याः धरणेन तज्जातकिणः व्रणं तस्य च
क्रं॥ केशव केशव धृतकच्छपरूप जय जगदीश हरे॥ धृतं कच्छपस्य रूपं रूपमाकाशे सोऽ
य्येतारकश्लोकयोरिति कोषः॥ ध्रुवपदम्॥ वसति दशनशिखरे धरणी तव लग्ना
शशिनि कलंककलेव निमग्ना॥ वसतीति सति का धरणी पृथ्वी कस्मिन् दशनशिखरे
दन्ताग्रे॥ किंभूतविशिष्टे धरणी लग्ना॥ केव॥ कलंककलेव॥ कलंकोऽङ्कापवादयोरिति को
षः॥ कस्मिन् शशिनि चन्द्रे॥ कथंभूता निमग्ना॥ केशव केशव धृतशूकररूप जय जग
दीश हरे॥ ध्रुवपदम्॥ तव करकमलवरे नखमद्भुतशृंगं॥ दलितहिरण्यकशिपुतनु
भृंगम्॥ अस्तीति किं तत्त्वं॥ कस्मिन् करकमलवरे॥ हस्तकमलश्रेष्ठे॥ वलिहस्तांशवा॥

श्री २

॥४॥

करा इति कोषः॥ कमलश्रीर्जलं पद्मं कमलं कमलो मृगः इति कोषः॥ वैरोचयामातरिश्चेषु

रवतो द्रैमीप्सितम्॥ मनागिष्टे वरयध्वकं दापहृतव्यंइ इति कोषः॥ कस्यतेवक

थंभूतं अद्भुतं शृंगं॥ अद्भुतप्रभूतं॥ प्रपल्लवफचीतोप्रव शृंगमग्रयसारपि इति कोषः॥

कथंभूतं दलितहिरण्यकशिपुतनुभृंगं॥ दलितं विदारितं हिरण्यकशिपोदैत्यस्यतनु

५ रवभृंगाभ्रमरोयत्र॥ अद्भुतोपमवंयं॥ केशव केशव धृतनरहरिरूप जय जगदीश

हरे॥ हे केशव हे केशव धृतनरसिंहरूपं॥ छलयसि विक्रमणे बलिमद्भुतवामनपद

नखनीरजनितजनपावन॥ हे अद्भुतवामन खर्वोह्रस्वो वामन इती कोषः॥

पर्वे च दिग्गजे विष्णौ वामनः परिकीर्तितः॥ इति कोषः॥ हे पदनखनीरजनितजनि

कंजनस्य पावन वामन पदस्य नखं पदनखनीरजेन जनितं उत्पादितां जनना

॥५॥

नीपावनं येनेति। पवनः पापनिर्मुक्तः पूतमानं च पवनं इति कोषः॥ चरणप्रद्धि दृष्टि प्रभवदा
कमंडलुजलपवित्रीकृत सकलजन इत्यर्थः॥ छलयसिवंचिकस्त्वं। केवलिदैत्यं॥ यस्मि
त्विक्रमेण त्रिभुवन गमनेन॥ वलिश्वामरदांडिस्याद्बलिः प्रजोपहारयोः॥ पलिः प्राण्यं
गसंकोचे वलि र्नाभि नलरि इति कोषः॥ केशवकेशवधृत वामनरूप जय जगदीश हरे
धृ पदम्॥ क्षत्रिय रुधिरमय जगदपगत पापं स्नपयसि शमितभवतापं। स्नप
यसि कस्त्वं कं जगतः॥ केस्मिन् पयसि जलपयः क्षीरं पयो जलमिति कोषः॥ कथंभू
तेषु पयसि क्षत्रिय रुधिरमये। क्षत्रियरक्तसंस्ते॥ कथंभूतं जगत् अपगत पापं॥ रवरिगु
तपापं॥ पुनः किं विशिष्टं जगतः शमित भवतापं। नाशित जन्मदुःखम्॥ प्रावृत्तिसंकर
सन्तापजन्मसंसारयोर्भव इति कोषः॥ ६॥ केशव केशवधृत भृगुपतिरूप जय
जगदीश हरे॥ ६२

हकेशव हे केशव धृतभृगुपतिरूप परशुरामस्वरूप ॥ जयपदुक्तो नवा वितरसि दिक्षु रणे
दिक्पतिकमनीयं ॥ दशमुखमौलिबलिं रमणीयं ॥ वितरसि ददासि कस्त्वं कोदंश
मुखमौलिबलिं दशमुखो रावणः तस्य मौलिः शिरः स देवबलिः पूजा बलिः पू
जोपहारः स्याद्बलिरीत्यबलिः करः बलिजे राशलवैः धंकर्म्म जटरावस्य यवो बलिरिति
कोषः ॥ कथंभूतं बलिं दिक्पतिकमनीयं दिक्पतिः अष्टदिक्पालानी मैं कमनीयं वां
छनीयं ॥ पुनः कथंभूतं रमणीयं ॥ लावण्यसंयुक्तो ॥ केशव केशव धृत नामशरीर ॥
रामो दशरथिः जयपदुक्तो भवा धुपदम् ॥ वहसि वपुषि विशदे वसनं जलदाभं
हलहतिभीतिमिलितयमुनाभ वहसि धारयसि कः त्वं किं वसनं वस्त्रं ॥
कस्मिन्वपुषि शरीरे ॥ कथंभूते विशदे शुभ्रे ॥ कथंभूतं वसनं जलदाभं ॥ जलदे

5

स्य वक्त्राजादीप्तिः तस्य वर्णोपि इत्यर्थः॥ पुनः कथंभूतं हलं इति नीतिमिलितयमुनाभम्॥
हलस्य लांगलस्य हतिः प्रहारस्तस्माद्भीतिर्भयेन मिलिता यमुना तस्य आजादीप्तिर्ये
स्येति॥ अत एव नीलजलदशदृशं वस्त्रं॥ केशव धृत हलधररूप जय जगदीश हरे॥ नि
न्दसि यज्ञविधेरहह श्रुतिजातं सदयहृदयदर्शितपशुघातं॥ अहह इत्याश्चर्ये॥ हे सदय
हृदयदयानुक्तोद्दयं वेत्ति यस्येति॥ निन्दसि कस्त्वं श्रुतियातं श्रुतिर्वेदस्य जातं
6 जन्म यस्य यज्ञविधेः यज्ञविधानस्य विधिर्विधानं धातारो विधिः स्यात्॥ कालदेवश्च
यो रीतिकोषः॥ कथंभूतं श्रुतिजातं दर्शितपशुघातं॥ दर्शितपशुवधं॥ केशव धृत बुद्धश
रीर जय जगदीश हरे॥ म्लेच्छनिवहनिधने कलयसि करवालं॥ धूमकेतुमिव किम
पि करालं॥ कलयसि धारयसि कस्त्वं करवालं खड्गं॥ कस्मिन्म्लेच्छनिवहनिधने॥ म्लेच्छानां

॥श्री॥ निबद्धः समूहस्तस्य निधनं नाशः निधनं कुरुनाशनमित्यमरः। कामिव धूमकेतुमिव॥ ॥६॥
॥६॥ उत्पातमिव। उत्पातस्वरूपमिव॥ कथंभूतं करालं॥ दन्तुरं भयानकं॥ करालो दन्तुरे तुङ्गे इति
कोषः॥ कथंभूतं किमपि अनिर्वचनीयं। स्यादुत्पातो धूमकेतुर्जनताशन इति कोषः॥ किंभूतं क-
रालं तुङ्गं॥ अतो दुर्नाशने न खड्गस्य शान्यं। केशव एव धृत कल्कि शरीर जय जगदी-
6 शहरे॥ ॥श्रीजयदेवकवेरिदमुदित शृणु सुखदं शुभदं जमुदारं भवसारं टीका: श्र ल
णुत किं इदं उदितं भाषितं। कस्य श्रीजयदेवकवेः कथंभूतमुदितं उदारं उद्भटं। 5
दारो दातृमहतोरुदक्षिणरां विदुरिति कोषः॥ पुनः कथंभूतं सुखं ददातीति सुखदम्॥
पुनः कथंभूतं शुभदम्। कल्याणदातारम्॥ पुनः कथंभूतं भवसारं इति संसारे सारं श्रीहं ॥श्री॥

केशवं केशव धृतदशविधरूप जय जगदीश हरे ॥ सुगमम् ॥ वेदानुद्धरते जगन्निवह
ते भूगोलमुद्बिभ्रते दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते पौलस्त्यं जयते हल
कलयते कारुण्यमातन्वते ॥ म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः ॥
॥ तुभ्यं कृष्णाय नमः ॥ कीदृशाय तुभ्यं दशाकृतिकृते दशावताराकृतिं दधारश
रीराय ॥ आकृति काय रूपयोरिति कोषः ॥ कथंभूताय तुभ्यं उद्धरते । कान् वे
दान् मीनरूपेण इत्यर्थः ॥ पुनः कथंभूताय निवहते किं जगत् कूर्मरूपेण इत्यर्थः ॥
पुनः कथंभूताय उद्बिभ्रते । किं भूगोलं पृथ्वीमंडलं वाराहरूपेण इत्यर्थः ॥ पुनः
कथंभूताय कुर्वते किं क्षत्रक्षयम् ॥ क्षत्रियाणां नाशम् ॥ परशुरामरूपेण इत्यर्थः ॥
पौलस्त्य कल्पान्ते द्रोपाप वर्यै रोगयो ॥ इति कोषः ॥ कथंभूताय तुभ्यं जयते । कं

पौलस्त्यं रावणं श्रीरामरूपिणेत्यर्थः॥ पुनः कीदृशाय तुभ्यं॥ केलयते धारयते किं हलं
लांगलं बलभद्ररूपिणेत्यर्थः॥ पुनः कीदृशाय तुभ्यं॥ मूर्छयते कान् म्लेच्छान् कल्कि
रूपिणे इत्यर्थः॥ एवं दशाकृतिकृते केशवाय तुभ्यं नमः॥ इति दशावतारविवरणम्॥ मु
ञ्जरीरागो ग॥ अष्टतालो॥ ॥ श्रितकमलाकुचमण्डल धृतकुण्डल ए कलितललितवनमा
ल हे॥ श्रितकमलाकुचमण्डल कमलाले ह्मीः श्रित आश्रितं कमलाकुचयोर्मण्डलं येन॥
धृतकुण्डलं धृतं कुण्डलं येन॥ कलित ललितवनमाल। कलिता धृता ललिता मनोज्ञा
वनमाला येन आपादलंबिनी वनमाला॥ ॥ जय जय देव हरे॥ जयजयेति संभ्रमे द्विरुक्तं॥
देवौ सुरमहीभुवौ इति कोषः॥ ध्रुवपदम्॥ दिनमणिमण्डलमण्डन भवखण्डन ए मु
निजनमानसहंस॥ दिनमणिः सूर्यः तस्य मण्डले बिंबं तत्र मण्डनं स्फुरणं यस्य स्थि
॥७॥ तिः सूर्यमण्डले विम्बे देशाद्वा दर्शतलेप्ये इति कोषः॥ दिनमणिमण्डले मिव मण्डनं ॥७॥

अलंकारो यस्येति। भवखंडनो भवस्य जन्मनः खंडनं विनाशो यस्मादिति॥ प्राप्ति संकर सत्रासु
जन्म संसार भव इति कोषः॥ मुनिजनमानसहंस॥ मुनिजनानां मानसे विचित्ते हंसः। अथवा मु
निजनानां मानसे चित्ते हंसः सूर्यः यतः सूर्यमंडलं भित्वा तपोधनाः परंपदमुपगच्छन्ति॥
योगिन्द्रे देवगो हंसोऽनिलोऽर्कमेदेप सूर्ययोरिति कोषः॥२॥ कालियविषधरगंजन जनरंज
न॥ यदुकुलनलिनदिनेश॥ जनानां लोकानां रंजनं मंजनः। कालियविषधरगंजन। कालि
यनागस्य गंजनम्॥ यदुकुलं तदेव नलिनपद्मं॥ तस्य दिनेशः सूर्य ईशाईस्वरवदृष्टः धमु
४ स्वद्राद्धितरुयोरिति कोषः॥ मधुमुरनरकविनाशन गरुडासन एसुरकुलकेलिनिदान॥
मधुश्चैवमुरश्च नरकश्च मधुमुरनरकाणां विनाश इति॥ मधुमवं मधुरक्तोदं मधुपुष्परसे
विदुः॥ मधुर्दैत्यो मधुश्चैत्रो मधुकोऽपि मधु स्मृत इति कोषः॥ गरुडस्य आसनं गरुडवाहन इत्य
र्थः॥ सुरकुलकेलिनिदान सुराणां देवानां कुलं वंशः सुरकुलानां केलिः क्रीडा तस्या नि

दानवादिर्किकारणं जिदानंवादिकारणमा॥६॥ अमलकमलदललोचन भवमोचन ए त्रिभु-
वनभवननिधानं॥ अमलेकमले स्वनिर्म्मलपद्मस्य दलेपत्रेइवलोचनेनेत्रे यस्येति दले ।८॥
खंडे दलपत्रेइतिकोषः॥ भवमोचन भवस्य संसारस्य मोचनं नाशनं दाः कल्याणकारकत्वा
त्॥ स्वरूपवा भवस्य जन्मतेमोचनं॥ मोक्षदायकत्वात्॥ त्रिभुवनभवनधान त्रिभुवनमेवभव
नं गृहं तस्य निधानं द्रव्यम्॥७॥ जनकसुताकृतभूषण जितदूषण ए समरशमितदश
६ कंठ॥ जनकसुता सीता यया कृतं भूषणं येनेति॥ तथा वनामरीभूषणंपविः जितादू
षणो राक्षसो येन॥ स्वरूपवा जितदोषो येनेति॥ समरशमित दशकंठ॥ समरे संग्रामे शमि-
॥८॥ तनाशितोदशकंठोरावणो येन॥८॥ अभिनवजलधरसुन्दर धृतमन्दर ए श्रीमुखचन्द्रच
कोर॥ श्रियालक्ष्म्याः मुखमेव चन्द्रस्तस्य चकोर॥ चुम्बनदानत्वात्॥ ज्यतेकोवन
चन्द्रं चन्द्रस्वमृगलांछनः इतिकोषः॥९॥ श्रीजयदेवकवेरिदं कुरुते मुदं ए मंगलमुज्ज्व

ललंगीतं॥ कुरुते किं इदं मंगलं कामुदं हर्षं॥ किंभूतं मंगलं उज्वलं गीतं विशिष्टं गानम्॥ क
स्य श्रीजयदेवकवेः इदानीं वसन्तर्तुमानक्रमेण राधेहेलेन माधवस्य क्रीडावर्द्धुकामः॥ प्रथमं
उन्नतेवासं शांतं॥ पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमुद्रितमुरो मधुसू
दनस्य॥ व्यक्तानुरागमिव खेलदनंगखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं वः॥ अनुपूरयि
तुं संवर्धयितुं किं उरः वक्षः। किंविशिष्टं कस्य मधुसूदनस्य वासुदेवस्य॥ केषां वो
(9) युष्माकं॥ उरो वत्सः उरः श्रेष्ठ इति कोषः॥ कथंभूतं उरः। पद्मापयोधरतटीपरिरंभलग्न-
काश्मीरकुंकुममुद्रितम्॥ पद्मायाः लक्ष्म्याः पयोधरौ स्तनौ तयोस्तटी मंडलं तत्र प
रिरंभ आलिंगनं तेन लग्नः काश्मीरो कुंकुमो तेन मुद्रितं चिह्नितं यत्र॥ तत्पुनः के
थंभूतं उरः खेलदनंगखेदस्वेदाम्बुपूरं॥ खेलत् क्रीडनशीलो सो अनंगः कंदर्प इति॥ खेल
दनंगेन खेदः प्रयासस्तेन स्वेदाम्बुतस्य पूरः समूहः प्रयासो यत्र॥ पूरो जलप्रवाहस्य॥ इति कोषः।

हरिविरहानलतप्तया राधया प्राराध्यारण्याय काचित्सखी हरिं कथितवती ।।।। वसं
ते वासन्तीकुसुमसुकुमारैरवयवैर्भ्रमन्तीं कान्तारे बहुविहितकृष्णानुशरणाम् ।। अमं
दं कन्दर्पज्वरजनितचिन्ताकुलतया वलद्बाधां राधां सरसमिदमूचे सहचरी ।। इदं उक्तवती
१ कासहचरी कां राधां किं ऊचे इदं अग्रे वक्ष्यमाणम् ।। कथंभूतं सरसं सुन्दरम् ।। कस्मिन्वसं
न्ते ।। कथंभूतां राधां वलद्बाधां वलन्ती तडन्ती बाधा यस्याः सा तथा पीडा बाधा व्यथा
८ दुःखमित्यमरः ।। कया कंदर्पज्वरजनितचिन्ताकुलतया कंदर्प एव ज्वरस्तेन जनिता
ता चिन्ता तया कुलतया विह्वलतया ।। कथं अमंदं ।। अनल्पम् ।। कथंभूतां राधां भ्रमन्तीं इत ७
स्ततः ।। कस्मिन्कान्तारे वर्त्मदुर्गमे ।। अथवा वने वा ।। कैः अवयवैः अङ्गैः ।। कथंभूतैः वासन्ती
१ कुसुमसुकुमारैः ।। वासन्ती माधवीलता तस्याः कुसुमं पुष्पम् ।। तद्वत्सुकुमाराणि कोम ८
लानि तैः ।। पुनः कथंभूतां राधां बहुविहितकृष्णानुशरणाम् ।। बहुप्रकारेण विहितं कृ

कृष्णस्य वासुदेवस्य ... नं पथा पूर्वोक्तमेव प्रतिपादयति ॥ वसन्ते रागे ॥ ॥ ल
लितलवंगलतापरिशीलनकोमलमलयसमीरे ॥ मधुकरनिकरकरम्बितकोकिलकूजित
कुञ्जकुटीरे ॥ ललितमतोहराल्लवंगलतातस्याः परिशीलं कंपनं तेन कोमलः ॥ मंदशमी
रणो वायुः ॥ सीतो मंद सुगंधस्या त्रिविधं वातेल दूरणम् ॥ पुनः कथंभूते सरस वसन्ते ॥ म
धुकराणां भ्रमराणां निकरः समूहस्तेन करंबिता युक्ता कोकिलाः सन्त्याः कूजितं कुञ्जकु
टीरो वनाभ्यन्तरे यत्र ॥ कुंजो गहनगह्वरो इति कोषः ॥ विहरति हरिरिह सरसवसन्ते
नृत्यति युवतिजनेन समं सखि विरहिजनस्य दुरन्ते ॥ ध्रु हे सखि राधे विहरति क्रीडति कः
हरिः कृष्णः कः इह सरसवसन्ते ॥ कथं समं सह केन युवतिजनेन ॥ कथंभूते सरसवसन्ते
दुरन्ते दुःखेन नीयमाने कः स्य विरहिजनस्य ॥ ५ ॥ उन्मदमदनमनोरथपथिकवधूजन

(10)

राग ।
५

ानितविलापे ॥ अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे ॥ पुनः कथंभूते स १०
रसवसन्ते । अमदः अस्तु को यासौ मदनः कंदर्पः तस्य मनोरथो मनोवांछितं येषु पथिक
वधूजनेषु । तेषां जनितः कृतः विलापो दुःखोच्चयेन ॥ स तथा ॥ पुनः कथंभूते सरसवसन्ते ॥ अ
लीनां भ्रमराणां कुलं समूहस्तेन संकुलानि व्याप्तानि कुसुमानि तेषां समूहस्तेन निराकुला
10 कुलव्याकुलः ॥ बकुलकलापो यस्मिन्निति ॥ मृगमदसौरभरभसवशंवदनवदलमालतमाले
युवतिजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले ॥ पुनः कथंभूते सरसवसन्ते
मृगमदस्य कस्तूरिकायाः सौरभं सुगंधिस्तेन रभसो हर्षो तेन वशंवदः आयाता ॥ तेषां
नवदलानि नूतनपत्राणि तेषां माला यस्मिन् तमाले ॥ पुनः कथंभूते वसन्ते ॥ युवती
१० जनानां हृदयं वक्षस्य विदारणम् ॥ मनसिजनखानां रुचिरिव रुचिर्येषां ॥ किंशुका
नां तथा ॥ कुसुमानां जालानि समूहा निर्यस्मिन् वासन्ते ॥

मल...

आलंप्रत्त्यादिबंधनइतिकोषः॥राधसेकिंशुकेपत्रेपलाशाख्याहरित्यपिकोषः॥मदनमही
पतिकनकदण्डरुचिकेशरकुसुमविकाशे॥मिलितशिलीमुखपाटलिपटलकृतस्मरतू
णविलासे॥पुनः कथंभूतेवसन्ते॥मदनएवमहीपतिःराजातस्यकनकदण्डस्यरुचिरि 5
वरुचिर्येषां॥केशरकुसुमानांनागकेशराणांविकाशः प्रकाशोयस्मिन्॥पुनः
मंथानमदसौन्येदृश्यतइतिकोषः॥पुनःकथंभूतेसरसवसन्ते॥मिलिताःशिलीमुखाः
11 भ्रमरायेषुपाटलिपटलेषुपाटलिसमूहेषु॥तैः कृतस्मरतूणविलासः कंदर्पतूणीरश
ङ्कायस्मिन्॥पटलंछदिर्विज्ञेयंमधुरैःसमूहयोनितिकोषः॥विगलितलज्जितजगद
वलोकनतरुणकरुणकृतहासे॥विरहिणीकृन्तनकुंतमुखकेतकीदन्तुरितासे॥पु
नः कथंभूतेवसन्ते॥विगलितंत्यक्तंलज्जितंजगत्तांयुवतानामवलोकनेतरुणकरुण॥तेनकृत

डानदुःखष्णु। कृतोहासोयत्रेति॥ अथवा अवलोकनेनतुरोः नूतनैः कसैः कुसुमैः कृ
तोहासोयेनेति॥ कयायांकरुणया प्रोक्तेति विखः पुनः कथंभूतेवसंते विरहिणां वियोगि
नां वियोगिनीपुरुषाणां निकृन्तने वियोगिजनमारणे कृतमुखाकृतयोयाः केतक्य
केतकीकुसुमानि तासां दंतुरिता उन्नतीकृता अगष्ठिशो यत्रेति॥ अकृतिकाया
रुपयोरित्ति को घ॥ आशाकदुकुम्भिस्तरछा यामितिकोष॥ माधविकापरिमललतिलि
तेनवमालिकयातिसुगंधो॥ मुनिमनसामपिमोहनकारिणि तरुणकारणबंधो॥ पु
नः कथंभूतेवसंते॥ अतिसुगंधौ॥ कया नवमालिकया॥ नवमालिकापुष्पेण॥ पुनः
कथंभूतेवसन्ते॥ तरुणकरुणबंधौ॥ तरुणानां अकारणेनहेतुनाबंधुस्मितम॥।७॥ स्फु
रदतिमुक्तलतापरिरंभनमुकुलितपुलकितवृते॥ वृन्दावनविपिनपरिसरपरिग
तयमुनाजलपूते॥ पुनः कथंभूतेवसन्ते॥ स्फुरन्तीदीप्यमाना अतिमुक्तलता अशोकलता

तस्य परिरंभणेन आलिंगनेन मुकुलितः पुलकितः रोमांचितः अतो यत्र॥ पुनः कथंभूते क्रीडशेषु
संते॥ परिसरे समीपे परिगता परिवेष्टिता यमुना तस्याः जलेन पूतं पवित्रं॥ यत्र विज्ञाते वृं
ते प्राप्ते विदुः परिगते ध्वनिरिति कोशः॥५॥ श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसार
सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम्॥ उदयति किं इदं॥ सरसवसन्तसमयव
12 नवर्णनम्॥ कथंभूतं हरिचरणस्मृतिसारम्॥ हरेर्वासुदेवस्य चरणौ तयोः स्मृतिः कोऽर्थः स्म
रणं वासुदेवचरणप्रधानमित्यर्थः॥ पुनः कथंभूतम् अनुगतो मदनस्य विकारो यत्र॥ ॥५॥ उन्मी
लन्मधुगंधलुब्धमधुपव्याधूतचूतांकुरक्रीडत्कोकिलकाकलीकलकलैरुत्कीर्णकर्णज्व
राः॥ नीयन्ते पथिकैः कथंकथमपि ध्यानावधानेक्षणप्राप्तप्राणसमासमागमरसोल्लासैर
मी वासराः॥ नीयन्ते के अमी वासराः॥ वसन्तदिवसाः कैः पथिकैः कथंकथमपि महता
दुःखेन॥ कैः ध्यानेनावधानं ध्यानावधाने क्षणं प्राप्तप्राणसमा स्त्रीतासां समागमः॥

१२ आगमस्तस्य रसोल्लासाह्वो स्तैरिति कथंभूता वासराः उद्गीर्णकर्णज्वराः श्रुतिपीडाप्रभुके उ
न्मीलन्तुद्भूताः मधुगंधाः पुष्परसास्तेषां गंधलुब्धाः ॥ आकोद्गरणाय मधुपास्तै व्याधूता धूतां
कुराः आम्रकुसुमाः स्तेषु क्रीडात्तां कोकिलानां काकलीकलकलैर्मधुर कोलाहलैः को
कलीतुकलस्वरः स्यमधुरे तोऽनु मधुराप्फुर ॥ इत्यमरः ॥ इदौ नीविरहिरिणा दुःसहवायुव स्मेनम ॥
दरविगलितमल्लीवल्लिवेवत्यरागप्रकटितपटवासैर्वासयन्काननानि ॥ इह दृ दर इति वेत
केतकीगंधबंधुः प्रसरदसमबाणप्राणवद्गंधवाहः ॥ इहेति कः गंधवाहः वायुः । किं वृतः
कथंभूतः प्रसरदसमबाणप्राणवत् प्रसरत्यसौ असमबाणाः कंदर्पस्तस्य प्रा
णावत ॥ क्व इह वसंते प्राणाश्च वल्लयोनुक्तः प्राणोदश्वरानिल इति कोशः ॥ कथंभूतो वा १२
युः केतकीगंधबंधुः केतकीगंधमित्रं ॥ किं कुर्वन् वासयन् काननानि केषु दराके वित
विगलितविकशितया मल्ली किंविशिष्टा विकशितमल्ली ति सा वल्लीलता ततश्च वातोद्भू

न्नोयेपरागाः पुष्परेणुवस्तैः प्रकटिताः पटवासासास्तैः दोषपदरोगन्तौ किंचि दर्पदरा व्ययमि
तिकोषः॥ अनेकनारीपरिरंभसंभ्रमस्फुरन्मनोहारिविलासलालसं। मुरारिमारा
दुपदर्शयन्त्यसौ सखी समक्षंपुनराहराधिकां॥ आह उक्तवती॥ का असौ सखी
कां राधिकां वाणि समक्षं प्रत्यक्षं॥ कथंभूता सखी॥ उपदर्शयन्ती किं मुरारिं कृष्णं कथं आ
रात्समीपतः॥ कथंभूतं मुरारिं॥ अनेकनारी अनेकाबहुतरा नार्यस्तासांपरिरंभः आलिंगनस्त
स्मिन्संभ्रमः आदरस्तेनस्फुरन्मनोहारीविलासे लीलायस्यतत्र लालसः उत्सुकः पापि
वास्यतं॥ त्रयंसंभ्रममिद्धन्ति॥ भयसंवेगमादरमितिकोषः॥ ॥रामकरीरागे॥ ॥यतिताले॥
चंदनचर्चितनीलकलेवरपीतवसनवनमाली॥ केलिचलन्मणिकुंडलमंडितगंडयुग
स्मितशाली॥ चंदनेनचर्चितंनीलंवपुवनादिस्तेनवलन्मणिकुंडलेयस्यातिचंचलमणिकुं
डलतेनमंडितंअलंकृतंगंडयुगलंयस्यस्मितेनहास्यनशालीशोभनः॥ हरिहंरिमुग्धवधूनि

करविलासिनि विलसति केलिपरे॥ विलसति शोभते कः हरिः कस्मिन् मुग्धवधूनिकरे मनो
हरस्त्रीसमूहे। मुग्धो मूढमनोहरौ इति कोषः॥ केइव सन्तो॥ मुग्धवधूनिकरे॥ विलसति वि
१२ लासयुक्ते॥ पुनः कथंभूते मुग्धवधूनिकरे। केलिपरे क्रीडायुक्ते॥ ध्रुपदम्॥ पीनपयोधर
भारभरेण हरिं परिरभ्य सरागं॥ गोपवधूरनुगायति काचिदुदञ्चितपंचमरागम्॥ अनुगा १२
यति॥ अनुपश्चाद्गायति॥ का काचित् गोपवधूः गोपाङ्गना॥ किं कृत्वा परिरभ्य आलिंग्य
अनुरागसहिता॥ केन पीनपयोधरभारभरेण॥ पीनौ स्थूलौ पयोधरौ तयोर्भरस्तेन॥ क
13 थंभूतं उदञ्चितपंचमरागम्॥ उदञ्चितः ऊर्ध्वगीतः पंचमरागो यस्मिन्॥ गोपशब्दस्तु मन्थां गु वा
गोपाल्लो वनचराणां तु कुलिशार्थे पि दृश्यते॥ नासोतिशयरागयोरिति कोषः॥
कापि विलासविलोललोचनखेलनजनितमनोजं॥ ध्यायति मुग्धवधूरधिकं मधुसू
दनवदनसरोजं॥ ध्यायति स्मरति॥ का कापि मुग्धवधूः मनोहरा स्त्री॥ कं मधुसूदनवद
नसरोजं॥ वासुदेवमुखाम्बुजम्॥ कथं अधिकं॥ कथंभूतं मधुसूदनवदनसरोजम्॥

विलासेन विलोलौ चंचलौ नेत्रे तयोर्लक्षणे नेत्रकटाक्षे शोभा जनितः उत्पन्नः मनोजः कंद
र्पो यत्र ॥ विलासो भावली लयोरिति कोषः ॥ कापि कपोलतले निलिता लपितुं किमपि गम्ना तिमू
ले ॥ चातुर्यमुच्चनितम्बवती है तं पुलकैरंकुरिते कूले ॥ कुचकुम्भ ॥ का ॥ कापि ब्रजवधूः गोपांगना ॥
14 कंदर्पितं स्वामिनं हरिं कथं चातुर्यशोभनं ॥ कथं नूतनितंबवती निलिता कस्मिन् कपो
लतले ॥ कथं नूतनस्तातिमूले ॥ कस्य समीपे ॥ किं कर्तुं लपितुं भाषितुं ॥ कथं किमपि श्रु
ति ध्वनीयं ॥ तलं चाधः स्वरूपयोरिति कोषः ॥ कथं भूते कपोलतले अनुकूले ॥
कैः रोमांचैः पुलकैः कंदर्प्य भावात् ॥ कंटिप्रदेशे रोमांचे पुलकं प्रसरे विदुरिति कोषः ॥
केलिकलाकुतुकेन चकाचितं मंजुलयमुनाजलपूते ॥ मंजुलवंजुलकुंजगतं विचक
र्षकरेण दुकूले ॥ विचकर्ष आकर्षवती का कापि वधूनितं ॥ कं अनुकूलं ॥ केन करेण हस्तेन ॥

॥१६॥ वलिहस्तां शवः कङ्कणः कस्मिन्दुकूले पट्टवस्त्रे ॥ केन केलिकला कुतुकेन ॥ क्रीडा कला कौतु-
केन ॥ कालाकालशिल्पेषु वैदग्ध्यं मूलधनस्यैव ॥ इष्टो वंशी कला धान्ये व्यपव्यक्ते मधुरे केन ॥१५॥
रीति कोषः ॥ कथं भूतं कल्पमं जुलं वञ्जुलकुञ्जगतं ॥ मञ्जुलो मनोहरो वञ्जुलोऽस्य अशोकस्य कु-
ञ्जं तत्र गतं ॥ कुञ्जो गहनगह्वरा विति कोषः ॥ कस्मिन्यमुनाकूले ॥ सैन्यस्य पार्श्वमे भागे जातीरे कू-
लमित्यपि इति कोषः ॥ कुरत लताल तरल वलयावलिकलितकलस्वनवंशे ॥ रासरसे सहनृ-
त्यति परा हरिणा युवतिः प्रशशंसे ॥ प्रशशंसे कायुवतिः केन हरिणा कृष्णेन ॥ कथं भूता यु-
वतिः नृत्यपरा ॥ कथं सह केन हरिणा कृष्णेन ॥ कस्मिन् रासरसे शारासो गोपाङ्गनानां संभू-
हस्ताव रसो हर्षः ॥ कथं भूते रासरसे ॥ करतलेन हस्ततलेन ॥ तरला ववला वलयवलिः
कं कणमालातेन कलितः संयुक्तः कलस्वनः ॥ मधुरध्वनिः ॥ इह दशो वेशो यत्र ॥ श्लिष्यति

14

अतिवेलप्रशा।यपीतिमाओद्धेछनिर्यरं॥

कामपि चुम्बति कामपि कामपि रमयति रामां॥ पश्यति सस्मितचारुतरामपरामनुगच्छति वामं॥ श्लि
ष्यति आलिंगति॥ कः हरिः कृष्णः कां कामपि रामां॥ रामा स्त्री रामठमश्वा महि ताशितै॥ रामः पशु
दिशेषस्वरामैवा तुरुलायुधोऽइति कोषः॥ चुम्बति कः कां कामपि रामाम्॥ रमयति कां कामपि रा
मां॥ क्रीडति कां कामपि रामां॥ पश्यति अवलोकयति॥ कथंभूतां वामां मनोज्ञाम्॥ वामं निर्भर
सुन्दरं द्रविणापयोर्वामः इत्यर्थः॥ प्रतीपार्थको वामः स समुदाहृतं कविवरैर्वामस्मृतेः शंकरः॥ वामः
15 पंचशरे पयोधरस्तने वामा स्मृता कामिनी॥ वामः स्याद्वड वाक्रुते लकवध्य वामोऽशिवमाद्दं भीति धूर्तधि॥
कथंभूतां रामां स्मितचारुतराम्॥ हास्यमनोज्ञां॥ अपरामाः अनुगच्छति॥ ४॥ श्रीजयदेवभणित
मिदमद्भुतकेशवकेलिरहस्यं वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम्॥ ५॥ वितनो
तु विस्तारयतु॥ किं इदं अद्भुतकेलिः क्रीडा॥ कानि शुभानि कल्याणानि॥ कस्मिन् वृन्दावनविपिने॥

कथंभूतं श्रीजयदेवभणितं ललितमनोहरं ॥ पुनः कथंभूतं यशस्यं ॥ यशयुक्तं ॥ च पुनर्श्रीकृष्णमेवार्थसं
हरति ॥ विश्लेषमनुरंजनेन जनयनानन्दमिन्दीवरश्रेणिश्यामलकोमलैरुपनयन्नंगैरनंगोत्स
वं ॥ स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यंगमालिंगितः शृंगारः सखि मूर्त्तिमानिव मधौ मुग्धो हरिः क्री
डति ॥ हे सखि मुग्धो क्रीडति कः हरिः कस्मिन्मधौ वसन्ते ॥ कथं स्वच्छन्दं ॥ स्वेच्छया ॥ कुतः अभि
तः पार्श्वतः ॥ काभिर्व्रजसुन्दरीभिर्गोपांगनाभिः ॥ पुनः कथंभूतो हरिः आलिंगितः ॥ कथं प्रत्यंगम् अंगमंगं
प्रति ॥ किं कुर्वन् जनयन् उत्पादयन् ॥ कं आनन्दं हर्षं केषां विश्लेषाज्जगतां ॥ अपना सर्वेषां विश्व
संज्ञां जगतः सर्वे इति कोषः ॥ केन अनुरंजनेन प्रीत्या ॥ किं कुर्वन् उत्पादयन् ॥ कं अनंगोत्सवम्
कंदर्पहर्षं कैः अंगैः कथंभूतैः इन्दीवरश्रेणिश्यामलकोमलैः नीलोत्पलपंक्तिः श्यामलकोमलैः मुक
रू वस्रंगा इव ॥ कथंभूतः शृंगारः मूर्त्तिमान् शरीरयुक्तः ॥ मधुमधौ मधुर्दोद्धं मधुपुष्परसं विदुः ॥ १ १५ १५

मधुर्दैत्यो मधुश्चैत्रो मधु कोपि मधुर्मतः इति कोषः ॥ मूर्त्तिः काठिन्यकाययोरिति कोषः ॥ अद्भुत संगवस
दुर्जंगकवल्लक्लेशादिवंशादिवेशावलम्ब ॥ प्रालेयो हिमः प्रालेयः प्लववनेच्छयानुसरतीति श्रीखंडशैलानि
लः किंविशिष्टः स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलन्ति कुहुकुहु इति कलोत्ता
लाः पिकानां गतिः अनुसरति अनुगच्छति ॥ कः श्रीखंडशैलानिलः मलयपर्वतवायुः ॥ कं ईशावल ३४
महादेवपर्वतं हिमालयमिति ॥ कया अनुसरति ॥ प्रालेयप्लववनेच्छयानुसरप्लववनवाञ्छया कस्मा
त् ॥ अद्भुत संगपर्वतकोडवसत्सोपभुजंगाः सर्पास्तेषां कवलस्य मन्दोगास्य क्लेशात् दुःखात् किं
वि ॥ उन्मीलन्ति काः गिरः याः वाचः केषां पिकानां कोकिलानां ॥ कथं इति कुहुः कुहुः इति ॥ किं
त्वा आलोक्य कानि । स्निग्धरसाले मौलिमुकुलानि । स्निग्धः सरसः रसालमौलिमुकुलानि
रसाले आम्रं च संमुकुलाकस्मात् ॥ हर्षोदयात् ॥ कथं भूताः गिरः कलोत्तालाः मधुरगंभीरस्व
स्वराः ॥ ॥ इति श्रीगीतगोविन्दे जयदेवकृते सामोददामोदरो नाम प्रथमः सर्गः ॥ ॥ ॥ ॥ ॥

16

१६ विहरति वने राधा रहसि हरौ विगलितनिजोत्कर्षादीर्ष्यावशेन गतेन्यतः ॥ क्वचिदपि लताकुञ्जे गुञ्जन्मधु १५
व्रतमण्डलीमुखरशिखरे लीना दीना प्युवाच रहः सखीम् ॥ उवाच का राधा ॥ कां सखीं ॥ कस्याः रहः एका
न्तरहः सुरतगुह्यचेतितिशास्त्रं ततः ॥ कथंभूता राधा दीना दुःखिता ॥ पुनः कथंभूता लीनापि ॥
कस्मिन् लताकुञ्जे लतागह्वरे कुञ्जे गह्वरे ॥ कथं क्वचिदपि ॥ कथंभूते लताकुञ्जे गुञ्जन्मधु
16 व्रतमण्डलीमुखरशिखरे ॥ गुञ्जन्तः अव्यक्तशब्दं कुर्वन्तो ये मधुव्रताः भ्रमरास्तेषां मण्डलैः समूह
स्तेन मुखराणि शब्दायमानानि शिखराणि अग्रभागा यस्मिन् ॥ कथंभूता राधा गता कुतः अन्यतः इतस्ततः स्था
नात् ॥ केन ईर्ष्यावशेन ॥ कस्मात् विगलितनिजोत्कर्षात् ॥ त्यक्तात्मसंमानात् ॥ कस्मिन् हरौ हसितक
१५ ण्ठे विहरति क्रीडति कस्मिन् वने वृन्दावने ॥ पुनः कथंभूते हरौ साधारणप्रणये सामान्यप्री १६
तिपुञ्जे ॥ पुष्पोऽत्रैव प्रतिपादयति ॥ ॥ गुर्जरीरागे यतिताले ॥ ॥ संचरदधरसुधामधुरध्वनिमुखरित
मोहनवंशं चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम् ॥ पुनः कथंभूतं रहसि ॥ संचरदधरसे

अधरः अंकुर एव सुधामधुरः अमृतस्वादस्तस्य ध्वनिस्तेन मुखरितः शब्दितः मोहनकारी वंशो यस्य पाति ॥
पुनः कथंभूतं हरिम् ॥ वलितदृगंचललो चनं ॥ नेत्रं विस्तारो यस्य तेन वंचलान्तो लयः कोशपाशि
कपोलयोर्द्विलोलखंडलवतंसं ॥ कर्णाभरणं यस्य तिमौलिः संयतकेशगुच्छदामनु कटयोस्तथ्या
इति कोषः ॥ रासे रतिमिह विहितविलासम् ॥ स्मरति मनो मम कृतपरिहासं ॥ हे सखि स्मरति ॥ कि
मनश्चितं ॥ किं स्मरति ॥ हरिं वस्य मम ॥ वदरुलोतां कुंजे ॥ कथंभूतं हरिं कृतपरिहासम् ॥ कृतपरिहासो
17 येन ॥ पुनः कथंभूतं हरिं विहितविलासम् ॥ विहितः कृतविलासो येनेति ॥ कस्मिन्रासे गोपक्रीडा
याम् ॥ रासस्तु गोदोहनक्रीडा इति कोषः ॥ ध्रुवपदम् ॥ चंद्रकचारुमयूरशिखंडकमंडलवलयितकेशम् ॥ (
प्रचुरपुरंदरधनुरनुरंजितमेदुरमुदिरसुवेशम् ॥ पुनः कथंभूतं मयूरस्य शिखंडके पिच्छं चंद्रके
न चारुमनोज्ञं ॥ चंद्रकचारु शिखंडस्य मंडले समूहस्तेन वलयितो वेष्टितः केशो यस्य सः ॥ अथ

याबंदूकः कांचनरुच्यते ॥ कांचनवं दूबं दुस्यमगलोद्धृत इति कोषः । पुनः कथं भूतं हरिं ॥ प्रबुरंमहान्तं
पुरन्दरविद्रुसत्तस्य धनुसाहृन्मे दुरः स्निग्धः मुदिरामे घोतद्युत्सु वैरोयस्य ॥ गोपक्रुदसवनितस्व व
ती मुखबुम्बेन लिंम्प्रितलोजं वंधुजीवसधुराधरपल्लवमुल्लसितस्मितशोभम ॥ पुनः [illegible] ११
की दृशं हरिं गोपानां वदनचसमूहर्ये पानि तुम्बवत्याः स्त्रियस्तासं मुखवुम्बनतेन लांभितः से
17 वाप्तो लोभो येनेति । पुनः कथं भूतं हरिं वंधुजीवद्वमधुरो मनोज्ञोऽधरपल्लवो यस्येति । पुनः
कथं भूतं हरिं उल्लसितस्मितशोभम् ॥ उल्लसितो मनोज्ञो स्मितशोभा यस्येति । वंधुको वंधु
जीवकः मधुरोमनोज्ञ इति कोषः ॥ विपुलपुलकभुजपल्लववलयितवल्लवयुवतिस
१२ हस्रं ॥ करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम् ॥ पुनः कथंभूतं हरिं ॥ विपुलपु
लकारोमकंटका यास्मिन् भुजपल्लवे तेन वलयिता वेष्टिता वल्लवयुवतीनां गोपीनां स[illegible]स्तोपेन।

पुनः कथंभूतं लक्ष्मीकरस्य वरणस्य उरहृदयं वत्तेषां महीविगणाः रत्नसमूहास्तेषां भवलं अलंकारस्तो
आंकरीनि तैश्चित्रितं खंडितं तमिन्नंकं धकारयेन अनिउ चमत्कारं दि पुनः कथं स्व लीवयोमणिः रत्नै
मरीतिर उज्ञानां वक्रं ट्टश्शास्तनो भ्रमैणो इति कोषः॥ उज्ज्वलघर्पटले वलेदिन्दुविन्दुकवन्दू नतिलकल:
ललाटं॥ पीनघनस्तनवानिसरमहृदंनं निहृयद्दूदयकपाटं॥ पुनः कथंभूतं हरिं उज्ज्वलदस्यमेघस्य पटलो
समूहस्तत्र चंचलं पो सोइन्दु स्वच्छस्तस्य विनिन्दाकारी यस्य स्वच्छतातिलकः। ईदृशो ललाटो यस्य॥ पुनः
(18) कथंभूतं हरिं पीनौ स्थूलौ वृन्नौ वृकटिनौ स्तनौ तयोः पनिसरो विस्तारन संत्रमहृनं पीडुनं तेन निर्दृय
दृयानी कृतंहृदयकपाटं यस्मात्॥ नातिलिमयमवार मनोहरं कुंडलमंडितगंडुसुदारं॥ पीतवसनमनु
गतमुनिमनुजं सुरकृतपानिवारम्॥ पुनः कीदृशं हरिं नातिलिमयस्य सुवर्णमयो शोभमानस्य देन
मनोहरौ कुंडलौ ताभ्यां मंडितं अलंकृतं गंडयुगले यस्य॥ पुनः कथंभूतं हरिं॥ उदारं उद्भटं॥ पुनः
कथंभूतं हरिं मुनिगणमनुजोमनुष्यस्वत्र सुरस्व तयोः ध्यातापरिवारो सेवकायेन॥ पीनवाम॥

पतिङ्गनस्तथारवकुविधानेके इति कोषः॥ विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तमिव
मयंतं॥ मामपि किमपि तरंगदनङ्गदृशा मनसा रमयन्तं॥ पुनः कथंभूतं हरिं मिलितसंगतं॥ कस्मिन् विशद
कदम्बतले॥ विशदः शुभ्रः कदम्बतलस्तत्र॥ कथंभूतं हरिं॥ शमयन्तं नाशयन्तं॥ किं कलिकलुषभ
यम्॥ पुनः कथंभूतं हरिं॥ रमयंतं क्रीडितं॥ कां कामपि रामां मम कथं तरलतरंगदृशा॥ केन मनसा चिते
न॥ ॥श्रीजयदेवभणितमति सुन्दरमोहनमधुरिपुरूपं॥ हरिचरणस्मरणं प्रति संप्रति पु
ण्यवतामनुरूपम्॥ ॥इदानीं मत्तां कर्षं कुर्वती कुदा हं कामहेन रमयामीति मनसा विचिन्तयन्
ती सखीं प्राह॥ गणयति गुणग्राममं भ्रामं भ्रमादपि नेहते वहति च परितोषं दोषं विमुञ्चति
दूरतः॥ युवतिषु वलं तृष्णे विरहिणि मां विना पुनरपि मनो वामं कामं करोति करोमि किं॥
करोमि किं मनश्चितं कं वामं॥ कस्मिन् सति॥ कृष्णे॥ कथंभूते कृष्णे॥ विरहिणि॥ कथं विना मां॥ पुनः
कथंभूते कृष्णे॥ वलत्तृष्णे द्र बलमने॥ कासु युवतिषु स्त्रीषु॥ गणयति॥ किं तेन मनः स्वं गुणग्रामं गुणा

१८

॥१८॥

सम्पूर्हं। कस्मिन्नाद्दल्लेः। ग्रामः समः समर्थेषु क्रन्द्रेशद्वादिपूर्वक इति कोषः॥ नेदृते को ग्रामं ग्राम
न्ति॥ कस्माद्ग्रामादपि। वरुत्तिवकं पसितोषकं। पासितुष्टिं। विमुंवति परित्यजति। कं दोषं। क
स्मात् दूरतः। अन्यनायिकाक्रीडासंपातदोषजितमर्षः॥ इदानीं हरिविरहानलसंतप्ता प्रा
णधारणोपायसखीमुवाव5त्कंठिता॥ ॥मालवरागे एकतालीताले॥ ॥स्मरत निकुंजग
गत या निभृतरहसि निलीय वसन्तं॥ चकितविलोकितशकलदिशा रतिर[illegible]भसरसेन हस
(19) न्तम्॥ सखि हे केशिमथनमुदारं रमय मया सह मदनमनोरथभावितया सविकारम्॥ ॐ॥ तया विं
निभृत निकुंजं गृहं॥ एकान्तनिर्जननिकुंजे वनगृहे। कथंभूतं केशिमथनं॥ वसन्तं। स्थितं। क
स्यां निशि रात्रौ॥ क्व। रहसि एकान्ते॥ रहः सुरतगुह्ययोरिति कोषः॥ किं कृत्वा निली[illegible]म्र ता ८
त्वा॥ पुनः कथंभूतं तया मया। चकितविलोकितशकलदिशा। चकितेन विलोकिताः॥ समस्ताः

॥१८॥

दृशोयवसा॥ पुनः कथं भूतं केशिमथनं। उदारं उद्भटं महान्तं वा॥ उदारो दातृमहतोऽदारो दक्षि-
णो विदुरिति कोषः। पुनः कथं भूतया मया। मदनमनोरथभावितया कां दृष्ट्वा वांछाभावि-
तया व्याप्तया। भावितं मैत्रिनं लब्धेइति कोषः॥ पुनः कथं भूतं केशिमथनं॥ सविकारं। कंद-
र्पोन्माद सहितं। स्वेदस्तंभोथरोमांचः स्वरभंगोपि वेपथुः। वैवर्ण्यमश्रुप्रलयः पुलकं सेति
19 सात्विकाः॥ ध्रुपदम्॥ प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलं॥ मृदुमधुरस्मित-
भाषितया शिथिलीकृतजघनदुकूलम्॥ पुनः कथं भूतं यामया॥ प्रथमसमागमलज्जित-
या। प्रथमो यो सौ समागमः संगमः तेन लज्जितया॥ कथं भूतं केशिमथनं॥ अनुकूलं। कैः पटु-
॥१८॥ चाटुशतैः। पटुः स्फुः पटुवादी॥ चाटुर्मनोज्ञः तेषां शतं सहस्रां तैरनुकूलं॥ पुनः कथं भूतया रा०८
मया॥ मृदुमधुरस्मितभाषितया॥ मृदुकोमलं मधुरं शोभनं तेन स्मितः ईषद्धासः भाषितो यया॥

४२ पुनः कथंभूतं केशिमथनं ॥ शिथिलीकृतनवघनदुकूलम्‌ ॥ शिथिलीकृत उद्घने नितम्बे दुकूलं

पट्टवस्त्रं यस्याः सा श्रोणिभागे स्त्रियः पूर्वं जघनं कटि इति कोषः ॥ किशलयशयननिवेशितया चि

रमिममेव ध्यानं । कृतपरिरम्भनचुम्बनया परिरम्भ कृता घरणानं ॥ पुनः कथंभूतया मया

किशलयशयननिवेशितया ॥ किं ● शैयंन नवपल्लवांत देवशयनं तेन निवेशितया शय्यां ९

● शयानं रतेरिति कोषः ॥ पुनः कथंभूतं केशिमथनं ॥ शयान क ऽरसिद्ध ध्ये । केश्याः म २०

मैवा कथं चिरं चिरकालं ॥ पुनः कथंभूतं यामया कृतपरिरम्भनचुम्बनया ॥ कृतं परिरम्भ

णं आलिंगनं चुम्बनं यया ॥ पुनः कथंभूतं केशिमथ● नं ॥ कृत्ता धरपानं कृत्ता धर

चुम्बनया ॥ किं कृत्वा पानि अपि आलिंगं आलिसनिमिलितलोचनया पुलकाविलि

ललितकपोलं ॥ अत जोल्लसी कलेवरया वनमदनमदादतिलोलं ॥ पुनः कथंभूतया मया ॥

अलसनिमीलितलोचनयां॥ पुनः कथंभूतं केशिमथनं॥ पुलकावलि॥ ललितकपा
लं॥ पुनः कथंभूतं या मया॥ श्रमजलशीकरकलेवरजा॥ पुनः कथंभूतं केशिमथनं॥ कर
मदनमदारतिलोलं॥ पुनः कथंभूतया मया॥ अलसननिमीलितमुद्रितलोचनेनैजया॥
२० पुनः कीदृशं केशिमथनं पुलकावलिललितकपोलं। कस्य रोमावस्या। अवलीबद्धि
स्तया ललितौ मनोहरौ कपोलौ यस्य तं॥ पुनः कथंभूतया मया। श्रमजलशीकरक
लेवरया। श्रमजेन जलेन पयसा जलेन प्रपासजलेन शीकृतं सहितं कलेवरं शरीरं यया।
पुनः कथंभूतं केशिमथनं अतिलोलं। अतिचंचलं॥ कस्मात्। करमदनमदात्। करस्य २०
हस्तो योसौ मदनः तस्य मदो हर्षः। गर्वो वा पुनः कथंभूतया मया॥ कोकिलकलरवकू
जितया जितमनसिजतंत्रविचारं॥ श्लथकुसुमाकुलकुंतलया नखलिखित
घनस्तनभारम्॥

कोकिलस्य कलरवो गंभीरध्वनिस्तद्वत्कूजितं भाषितं यस्याः सा॥ पुनः कथंभूतं केशिमथनं॥ जि
तमनसिजतंत्रविचारं॥ जितमनसिजस्य कंदर्प्पस्य तंत्रविचारो कामशास्त्रज्ञानो येन॥ पुनः कथंभूतया म
मया॥ श्लथकुसुमाकुलकुंतलया॥ श्लथकुसुमैराकुलव्याकुलाः कुंतलाः केशा यस्याः सा॥ पुनः
कथंभूतं केशिमथनं॥ नखलिखितघनस्तनभारं॥ नखैर्लिखितो घनः स्थूलो स्तनभारो येन स तथा॥
(21) चरणरणितमणिनूपुरया परिपूरितसुरतवितानं॥ मुखरविशृंखलमेखलया सकचग्रहचुंबनदा
नम्॥ पुनः कथंभूतया मया॥ चरणरणितमणिनूपुरया॥ चरणयोः पादयोः रणितौ शब्दितौ मणि
मणिनूपुरौ मणिमंजीरौ यस्याः सा॥ तथा पुनः कथंभूतं केशिमथनं॥ परिपूरितसुरतवितानं॥ परि
पूरितो व्याप्तः सुरतस्य वितानो विस्तारो येन॥ वितानः कथितो यज्ञोस्त्र्यविस्तारयोरपि मंदवेष्ट्यो
वितानंवा वितानं तथाच्छवेश्मनि इति कोषः॥ पुनः कथंभूतया मया॥ मुखरविशृंखलमेखलया॥
मुखरा शब्दायमाना विशृंखला शिथिला मेखला क्षुद्रघंटिका यस्याः सा॥ तथा पुनः कथंभूतं केशिमथनम्॥

सकवयस्य बुधनदानस्यभकवयस्य सहितबुधनदानं।।रतिसुखसमयरसालसतयाऽस्मुकुलि ।।२१।।
तनयनसरोडं।।निस्सह निपतिततनुलतयामधुसूदनमुदितमनोजम।।पुनः कथंभूतया मया
रतिसुखसमयरसालसतया।।रतिसुखस्य सुरतसुखस्य समयः कालस्तस्य रसोऽनु
रागस्तेन अलसया यस्याः सा।।त०या।।पुनः कथंभूतं केशिमथनं।।दरमुकुलितनयनस
रोजं।।दरं किंचित्।।मुकुलितमुद्रितेनयनसरोजे।।नेत्रपद्मे येन।।दरोभयोर्दरोगर्त्तो
किंचिदर्थेदरोव्ययइतिकोषः।।पुनः कथंभूतयामया निस्सहनिपतिततनुलतया।।नि
स्सहं अतिशयं निपतिततनुलताशरीरलता यस्याः सा।।पुनः कथंभूतं केशिमथनं।।
मधुसूदनमुदितमनोजम।।मधुसूदने मुदितः हर्षितः मनोजः कंदर्पोयत्र।।अथवा
।।२२।। मुदितमनपदं उदितमनोजं उद्भूटकंदर्पं।। ।।श्रीजयदेवभणितमिदमतिशयमधुरिपुनि

धुवनशीलं॥ सुखमुत्कंठितगोपवधूकथितं वितनोतु सलीलम्॥ प्रवितनोतु विस्तारयतु किं श्री
जयदेवभणितम्॥ कथंभूतं अतिशयमधुरिपुनिधुवनशीलं॥ अतिशयेन मधुनिपो वासुदेवस्य
निधुवनशीलं सुरतस्वभावं यत्र॥ पुनः कथंभूतं उत्कंठितगोपवधूकथितम्॥ उत्कंठिताया
गोपवधूतया भणिते भाषितं॥ कथंभूतं सलीलं सक्रीडं॥ ॥नैवागतः समुचितेऽपि वासुदे
भुजालोऽपि नः स्वयुक्तकार्यवशेन यस्याः॥ दुर्वारवृत्तविरहज्वरतापितां सोमुत्कंठितां वदंतां
(22) मत्तोमुनींद्रमहस्तम्याविलाशवंशमनजंभूवाल्लि ममुद्भवल्लवीष्टन्दोत्सानि दृगन्तवीक्षित
मतिः स्वेदार्द्रगण्डस्थलम्॥ मामुद्वीक्ष्य विलज्जितं स्मितसुधामुग्धाननं कानने॥ गोविन्दं व्र
जसुन्दरीगणवृतं पश्यामि दृष्याम्यिव॥ पश्यामि कः अहं गोविन्दं वासुदेवं न केनलं पश्यामि दृ
ष्यामिव॥ कस्मिन्कानने॥ कथंभूतं गोविन्दं विलज्जितम्॥ किं कृत्वा उद्वीक्ष्य आलोक्य कां मां

पुनः कथंभूतं गोविंदं व्रजसुन्दरीगणावृतम् ॥ गोपांगनासमूहवेष्टितम् ॥ पुनः कथंभूतं गोविंदं हस्त
॥२२॥ न्यस्तविलक्षणवंशो ॥ हस्तान्यस्तोत्रष्टो वंशो विलाशवंशः क्रीडावंशो यस्य ॥ अनङ्गभ्रुवल्लिवी
नभ्रूलता ॥ पुनः कथंभूतं गोविंदं ॥ उद्वल्लवीवृन्दोत्सारिदृगन्तवीक्षितम् ॥ उज्जतारुर्यतावल्ल
व्यः ॥ गोपांगनास्त्रीभिरुत्सारितं दृगन्तं तिर्यक्कटाक्षम् ॥ तेन वीक्षितं अवलोकितं ॥ पुनः कथं
भूतं गोविन्दं ॥ च्युतिस्विदार्द्रगंडस्थलं ॥ च्युतिस्वेदेन आर्द्रं गंडस्थलं ॥ कपोलं यस्य ॥ दूराल्लो
कस्तवकजनकाशोकलतिकाविकाशः काशारोपवनपवनोपि व्यथयति ॥ अपि चाम्य
ह्रीरीतिरम्भानपुकुलप्रसूतिस्वूतानां सधिवशिखरीरीयं सुखमति ॥ ॥ व्यथयति दूच
व्यापांकारयति ॥ कः दूराल्लोकसावेकनवेकाशोकलतिकाविकाशः दूरात् लोकस्तोकः किंचि
त्स्तवकनवकाशोकलतिकाविकाराः ॥ न केवलं मनो व्यथयति । कासारोपवनपवनोपि मं ॥२२॥
यजति ॥ कासानस्य सरोवनस्य उपसमीपे वनः स्पः । हे सखि न सुखं यति न सुखं कारयति

ह

(23)

कामुकुलप्रसूतिरिति नपिमुकुलानी मंजरीणां प्रसूतिः केषां भूतानां॥ कथं भूता शिखरि
णी अग्रभाग सहिता॥ पुनः कथंभूता चम्पकद्रुमैः परिगतरमणीया॥ चाम्पकद्रुमशाखीलया
भृंगीतासां शरीतैः शाद्रृतम्॥ तेनरमणीया मनोहरा॥ शिखरिणी छन्दोपि नाम्ना भवति॥
साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजा
मूलार्द्धहस्तस्तनं गोपीनां निभृतं निरीक्ष्य ललितं काविच्चिरं चिंतयन्नन्तर्मुग्धमनोहरो हरतु
शं नवं केशवः॥ ॥इति श्रीगीतगोविन्दे टीकायां द्वितीयः क्लेशकेशवो नाम सर्गः॥ ॥ ॥
हरेर्वर्णनं कथ्यते॥ ॥इदानीं हरिराधिकानुसारेण कामो वभूवः॥ ॥कंसारिरपि संसा
रवासनाबद्धशृंखलां॥ राधामाधाय हृदये तत्याज व्रजसुन्दरीः॥ तत्याज तत्याज को वान॥ कं कं
सारिः कृष्णः कां व्रजसुन्दरीगोपांगना॥ किं कृत्वा आधाय॥ कां राधां॥ कस्मिन् हृदये॥

॥२३॥ कथंभूतां राधां संसारवासनाबद्धशृंखलाम्॥ संसारवासना अभिलाषस्तस्य शृंखलाय
स्याः॥ इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः॥ कृतानुतापः स कलिंदन
न्दिनीतटान्तकुञ्जे॥ निषसाद माधवः। कलिन्दनन्दिनी यमुना तस्यास्तटान्ते तटसमीपे॥ कु
23
ञ्जो वनं तस्मिन्॥ कथंभूतो माधवः कृतानुतापः कृतपश्चात्तापः। किं कृत्वा अनुसृत्य अ
न्वेषणं कृत्वा। कां राधिकां कुतः इतस्ततः। कथंभूतो माधवः अनंगबाणव्रणखिन्नमा
नसः। अनंगः कंदर्पस्तस्य बाणास्तेषां व्रणा रक्तास्तेन खिन्नं पीडितं मानसं चित्तं यस्य॥
अतएव कृतानुतापः॥ ॥गुर्जरीरागे यतिताले॥ ॥मामियं चलितां विलोक्य वृतं वधू ॥२३॥
निचयेन॥ सापराधतया मयापि न वारितातिभयेन॥ इयं राधा चलिता गता॥ किं कृत्वा
विलोक्य मां॥ कथंभूतं मां वृतं वेष्टितं केन वधूनिचयेन स्त्रीसमूहेन॥ कथंभूता राधा

ननिवारिता ननिर्विद्धा केन ॥ अतिभयेन कया ॥ अपराधात् तया ॥ अन्यनायिकासंगमापराधः ॥ १ ॥
हरिहरि हतास्वतया ॥ गता सा कुपितेव ॥ हरिहरीति कष्टे ॥ गता का सम्बधिका ॥ वायं तां कुपि
तेव ॥ कया स्तादरतया ॥ ॥ ध्रुवपदम् ॥ ॥ किं करिष्यति किं वदिष्यति सा चिरं विरहेन ॥ किं
सुतेन धनेन च किं मम जीवितेन गृहेण ॥ किं करिष्यति सा राधिका ॥ किं वा वदिष्यति ॥ केन वि
24 रहेण ॥ कथं चिरं बहुकालं ॥ किमस्ति केन धनेन ॥ [illegible]नेन वा ॥ किं प्रयोजनं ॥ कस्य मम जीवि
तेन वा किं गृहेण वा ॥ किं इति विषादस्य वचनम् ॥ २ ॥ चिन्तयामि तदाननं कुटिलभ्रूरोषभरेण ॥
शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण ॥ ३ ॥ चिन्तयामि चिन्तितदाननं राधामुखम् ॥ किं न
तं कुटिलभ्रूकोपभरेण ॥ कुटिलं वक्रं भ्रूकोपातिशयेन ॥ किमिव तदाननं शोणपद्म
मिव ॥ बंधुजीवाननं यं पंकजमिव ॥ रक्तपद्ममिव ॥ कथंभूतं पद्मं ॥ भ्रमाकुलं केन भ्र

॥२४॥ मरेण॥ कथंभूतेन अमरेण॥ आमत्ता॥ कुडुपति अमत्तः॥ कामुके अंगे इति कोषः॥ तामहं दृ
ष्टिसंगतां मणिशं अंशं रमयामि किं वनेन सुरामितामिद्ध किं तृष्णाविलयामि॥ किं स्मामि॥
२५ तामिद्ध तृष्णाविलयामि रमयति कः अंशं॥ कांतं राधिकाम्॥ कथंभूतां मिलिताम्॥ क
स्मिन्॥ कृष्टि कथं अंशं अत्यर्थः॥ अतिशय वारंवारं॥ किं नीति वितर्के॥ अनुसरामि कं
तां क्व इव ने॥ तन्वि रखिन्नमश यया कृदयं तवा वल्लयामि॥ तत्र एव वद्मि कुतो गतासि न
तेन तेनयामि॥ ६॥ हे तन्वि राधे आकलयामि॥ किं हृदयमाधि नं॥ कस्यास्तव को
भूतं पीडितं रविन्नं॥ कया अष्टरूपया इर्ष्यया॥ तत्रैव वद्मि न जानामि॥ कुतः बोध वा
गतासि केन कारणेन॥ तेतु अंतं तामनुनयामि॥ अन्वेषणं न करोमि॥ दृष्यसे पुनः ॥२४॥
गतागतमे वमे विदधासि किं पुरेव ससंभ्रमं परिरंभनं न ददासि॥ ५॥ हे प्रिये राधिके

पुरतः आगता त्वं दृश्यसे ॥ त्वं एवं विदधासि ॥ करोषि किं नरदासि । किं परिरंभनं आलिंगनं । कथं ससं
भ्रमं । आदरसहितं कस्यमेमम कपुरेवा ॥ यथापूर्वमालिंगनं त्वया दत्तं तथैव मया । ससंभ्रममिच्छति ॥
भयं संवेगमादरमिति कोषः ॥ क्षम्यतामं परं कदापि तवेदृशं न करोमि देहि सुन्दरि दर्शनं मम मन्मथे
न दुनोमि ॥ धाष्ट्र्या चेमम दोषः क्षम्यतां ॥ ईदृशं आदरं ॥ कं अहं केनं अपरतन करोमि वा कदापि
25 श्रुति क्षम्यतां ॥ हे सुन्दरि देहि कान्त्वं । किं मम दुनोमि दुःखितो भवामि । कः अहं केन मन्मथेन कं
दर्पिता ॥ ॥ वर्णितं जयदेवकेन हरिदं प्रणतेन किंदुविल्वसमुद्रसंभवरोहिणीरमणेन ॥ ॥
किंदुविल्वनामग्रामः स एव समुद्रस्तत्संभवा तदुत्पन्ना रोहिणी तस्यैव भार्या तस्य रमणः पतिस्ते
ना । अथवा रोहिणीपतिश्चन्द्रवत्कृटि विशालता हसरो नायं भुजंगमनायकः ॥ कुवलयदलश्रेणी

॥२५॥

25

कंठेन सागरलघुतिः ॥ मलयपडारड्लोनेदं न श्रमक्रिया रहिते मयि प्रहरणाहरत्रान्यनंगकु धा किमु
धावसि ॥ हे अनंग कंदर्प्प उ इति वितर्के ॥ किं धावसि ॥ कस्मिन्मयि विविक्ते ॥ कयाहारश्रेण्या ॥ मत्हृदे
न भ्रमेण ॥ कथंभूते मयि प्रियरहिते ॥ श्रीविरहिते ॥ अस्ति कः विशलताहारः ॥ कस्मिन्हृदि ॥ अयं भुज
गमनायकेन ॥ कंठे कुवलयदलश्रेणी नीलोत्पलपत्रपंक्तिः ॥ गनलघुतिः सा न भवति इदं मलय
जरजो भवति न चंदनधूलिः ॥ भश्म न भवति ॥ अतः कारणात्मा न प्रहरणप्रहारं कुरु ॥ कस्मिन्मयि ॥ ॥
पाणौ मा कुरु वृतशायक ममुं मा वापमारोपय क्रीडानिर्ज्जितविश्वमूर्द्धितजनाघातेन किं पोउ
बम् ॥ तस्मा एव मृगीदृशः स्मरशरोदं वल्कटात्हीनलज्जालाजर्जरितं मनागपि तदानाद्यापि संल
द्वसे ॥ मा कुरु कस्त्वं कं वृतशायको बाणस्तं वृतशायकं अमुमारोपयकं वापं धनुः । कस्मिन्रापा
त्वोरुषाकेन क्रीडानिर्ज्जितविश्वमूर्द्धितजनो घातेन ॥ क्रीडैव निर्ज्जितं विश्वं तत्र मूर्द्धितो मारि ॥२५॥

तायेऽतनाः तेषां घातं मारणं तेन अद्यापि न संधुक्षते तेन क्रोशति। किं तन्मनः। क्षणं मनागपि॥
कथंभूतं मनः स्मरशरोद्वल्कटाग्रानल ज्वालाऽऽजर्जरितं। स्मरस्य कंदर्पस्य शरास्ति
यं कुटुदश्वल्कटाग्रं॥ बं बल्कटाग्रं। तदेव अनलो अग्निः तस्य ज्वालादीप्तिस्तयाज
र्जरितं खंडितं॥ कस्यास्तस्याः एवमृगीदृशो राधिकायाः॥ ॥भ्रूपल्लवं धनुरपांगत
26 रंगितानि बाणा गुणश्रवणपालीति स्मरेण॥ तस्यामनंगजयजंगमदेवतायां शस्त्राणि
निर्जितजगन्ति किमर्पितानि॥ अर्पितानि समर्पितानि कानि अस्त्राणि केन स्मरे
ण कंदर्पेण॥ कस्यां तस्यां राधिकायां॥ कथंभूतायां। अनंगजयजंगमदेवतायां॥
अनंगस्य कंदर्पस्य जयस्तत्र जंगमदेवता तस्यां। कथंभूतानि अस्त्राणि निर्जित
जगंति॥ जितत्रिभुवना। भ्रूपल्लवो धनुर्भवति। सन्ति कानि अपांगतरंगितानि॥

॥२६॥ लोचनान्तविलसितानि ॥ तान्येव बाणा श्रीसिकाः बाणपाणिः ॥ कस्मिंल्लतिका सेवगुणः
26 पतं विका ॥ तानि स्पर्शसुखानि तेऽत्र तं रत्ताः स्निग्धा दृशो विभ्रमा स्तद्वक्त्राम्बुजसौरभम् ॥ स
वस्तु चास्य त्वं गिरां वक्रिमा ॥ सा विम्बाधरमाधुरी ति विषयासंगेऽपि चेन्मानसं तस्यास
